श्री भद्रकाळी कवचं

श्री भद्रकाळी कवचं

नारद उवाच |
कवचं श्रोतुमिच्छामि तां च विद्यां दशाक्षरीं |
नाथ त्वत्तो हि सर्वज्ञ भद्रकाळ्याश्च सांप्रतं || 1 ||

नारायण उवाच |
शृणु नारद वक्ष्यामि महाविद्यां दशाक्षरीं |
गोपनीयं च कवचं त्रिषु लोकेषु दुर्लभं || 2 ||

ॐ ह्रीं श्रीं क्लीं काळिकायै स्वाहेति च दशाक्षरीं |
दुर्वासा हि ददौ राज्ञे पुष्करे सूर्यपर्वणि || 3 ||

दशलक्षजपेनैव मंत्रसिद्धिः कृता पुरा |
पंचलक्षजपेनैव पठन् कवचमुत्तमं || 4 ||

बभूव सिद्धकवचोऽप्ययोध्यामाजगाम सः |
कृत्स्नां हि पृथिवीं जिग्ये कवचस्य प्रसादतः || 5 ||

नारद उवाच |
श्रुता दशाक्षरी विद्या त्रिषु लोकेषु दुर्लभा |
अधुना श्रोतुमिच्छामि कवचं ब्रूहि मे प्रभो || 6 ||

नारायण उवाच |
शृणु वक्ष्यामि विप्रेंद्र कवचं परमाद्भुतं |
नारायणेन यद्दत्तं कृपया शूलिने पुरा || 7 ||

त्रिपुरस्य वधे घोरे शिवस्य विजयाय च |
तदेव शूलिना दत्तं पुरा दुर्वाससे मुने || 8 ||

दुर्वाससा च यद्दत्तं सुचंद्राय महात्मने |
अतिगुह्यतरं तत्त्वं सर्वमंत्रौघविग्रहं || 9 ||

अथ कवचं |
ॐ ह्रीं श्रीं क्लीं काळिकायै स्वाहा मे पातु मस्तकं |
क्लीं कपालं सदा पातु ह्रीं ह्रीं ह्रीमिति लोचने || 10 ||

ॐ ह्रीं त्रिलोचने स्वाहा नासिकां मे सदावतु |
क्लीं काळिके रक्ष रक्ष स्वाहा दंतं सदावतु || 11 ||

ह्रीं भद्रकाळिके स्वाहा पातु मेऽधरयुग्मकं |
ॐ ह्रीं ह्रीं क्लीं काळिकायै स्वाहा कंठं सदावतु || 12 ||

ॐ ह्रीं काळिकायै स्वाहा कर्णयुग्मं सदावतु |
ॐ क्रीं क्रीं क्लीं काळ्यै स्वाहा स्कंधं पातु सदा मम || 13 ||

ॐ क्रीं भद्रकाळ्यै स्वाहा मम वक्षः सदावतु |
ॐ क्रीं काळिकायै स्वाहा मम नाभिं सदावतु || 14 ||

ॐ ह्रीं काळिकायै स्वाहा मम पृष्ठं सदावतु |
रक्तबीजविनाशिन्यै स्वाहा हस्तौ सदावतु || 15 ||

ॐ ह्रीं क्लीं मुंडमालिन्यै स्वाहा पादौ सदावतु |
ॐ ह्रीं चामुंडायै स्वाहा सर्वांगं मे सदावतु || 16 ||

प्राच्यां पातु महाकाळी आग्नेय्यां रक्तदंतिका |
दक्षिणे पातु चामुंडा नैर्ऋत्यां पातु काळिका || 17 ||

श्यामा च वारुणे पातु वायव्यां पातु चंडिका |
उत्तरे विकटास्या च ऐशान्यां साट्टहासिनी || 18 ||

ऊर्ध्वं पातु लोलजिह्वा मायाद्या पात्वधः सदा |
जले स्थले चांतरिक्षे पातु विश्वप्रसूः सदा || 19 ||

फलश्रुतिः |
इति ते कथितं वत्स सर्वमंत्रौघविग्रहं |
सर्वेषां कवचानां च सारभूतं परात्परं || 20 ||

सप्तद्वीपेश्वरो राजा सुचंद्रोऽस्य प्रसादतः |
कवचस्य प्रसादेन मांधाता पृथिवीपतिः || 21 ||

प्रचेता लोमशश्चैव यतः सिद्धो बभूव ह |
यतो हि योगिनां श्रेष्ठः सौभरिः पिप्पलायनः || 22 ||

यदि स्यात् सिद्धकवचः सर्वसिद्धीश्वरो भवेत् |
महादानानि सर्वाणि तपांसि च व्रतानि च |
निश्चितं कवचस्यास्य कलां नार्हंति षोडशीं || 23 ||

इदं कवचमज्ञात्वा भजेत् कळीं जगत्प्रसूं |
शतलक्षप्रजप्तोऽपि न मंत्रः सिद्धिदायकः || 24 ||

इति श्री भद्रकाळी कवचं |